
श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્‌ભાગવત રસિક કુટુંબ

## UG-11.15 - તૃતીય સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्‌भुत अनमोल उद्‌गार।।

**નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.**
**દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્.**

**નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્.**
**પ્રણામો દુ:ખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.**

**શ્રીમદ્‌ભાગવતમહાપુરાણમ્**
**એકાદશઃ સ્કન્ધઃ**
**.. અથ પઞ્ચદશોઽધ્યાયઃ - ૧૫ ..**

**શ્રીભગવાનુવાચ**

**જિતેન્દ્રિયસ્ય યુક્તસ્ય, જિતશ્વાસસ્ય યોગિનઃ .**
**મયિ ધારયતશ્ચેત ઉપતિષ્ઠન્તિ સિદ્ધયઃ .. ૧..**

જિતશ્વા + સસ્ય, ધારયતશ્ + ચેત

**ઉદ્ધવ ઉવાચ**

**કયા ધારણયા કાસ્વિત્, કથં(વ્) સ્વિત્ સિદ્ધિરચ્યુત .**
**કતિ વા સિદ્ધયો બ્રૂહિ, યોગિનાં(મ્) સિદ્ધિદો ભવાન્ .. ૨..**

સિદ્ધિ + રચ્યુત

**શ્રીભગવાનુવાચ**

**સિદ્ધયોઽષ્ટાદશ પ્રોક્તા, ધારણાયોગપારગૈઃ .**

**તાસામષ્ટૌ મત્પ્રધાના, દશૈવ ગુણહેતવઃ .. ૩..**

ધારણા + યોગપારગૈઃ

**અણિમા મહિમા મૂર્તેર્ લઘિમા પ્રાપ્તિરિન્દ્રિયૈઃ .**

**પ્રાકામ્યં(મ્) શ્રુતદૃષ્ટેષુ, શક્તિપ્રેરણમીશિતા .. ૪..**

પ્રાપ્તિ + રિન્દ્રિયૈઃ, શક્તિ + પ્રેરણ + મીશિતા

**ગુણેષ્વસ(ઙ્)ગો વશિતા, યત્કામસ્તદવસ્યતિ .**

**એતા મે સિદ્ધયઃ(સ્) સૌમ્ય, અષ્ટાવૌત્પત્તિકા મતાઃ .. ૫..**

યત્કામસ્ + તદ + વસ્યતિ, અષ્ટા + વૌત્ + પત્તિકા

**અનૂર્મિમત્ત્વં(ન્) દેહેઽસ્મિન્, દૂરશ્રવણદર્શનમ્ .**

**મનોજવઃ(ખ્) કામરૂપં(મ્), પરકાયપ્રવેશનમ્ .. ૬..**

અનૂર્ + મિમત્ + ત્વં(ન્),

દૂર + શ્રવણ + દર્શનમ્ ,પરકા + યપ્રવેશનમ્

**સ્વચ્છન્દમૃત્યુર્દેવાનાં(મ્) સહક્રીડાનુદર્શનમ્ .**

**યથાસ(ઙ્)કલ્પસં(વ્)સિદ્ધિ-રાજ્ઞાપ્રતિહતાગતિઃ .. ૭..**

સ્વચ્છન્દ + મૃત્યુર્ + દેવાનાં(મ્), સહ + ક્રીડા + નુદર્શનમ્

યથા + સ(ઙ્)કલ્પ + સં(વ્)સિદ્ધિ + રાજ્ઞા + પ્રતિ + હતાગતિઃ

**ત્રિકાલજ્ઞત્વમદ્વન્દ્વં(મ્) પરચિત્તાદ્યભિજ્ઞતા .**

**અગ્ન્યર્કામ્બુવિષાદીનાં(મ્) પ્રતિષ્ટમ્ભોઽપરાજયઃ .. ૮..**

ત્રિકા + લજ્ઞત્વ + મદ્વન્દ્વં(મ્), પરચિત્તા + દ્યભિજ્ઞતા

અગ્ન્યર્ + કામ્બુ + વિષાદીનાં(મ્) ,પ્રતિષ્ + ટમ્ભોઽ + પરાજયઃ

એતાશ્ચોદ્દેશતઃ(ફ્)પ્રોક્તા, યોગધારણસિદ્ધયઃ .

યયા ધારણયા યા સ્યાદ્, યથા વા સ્યાન્નિબોધ મે .. ૯..

એતાશ્ + ચોદ્ + દેશતઃ(ફ્),

યોગ + ધારણ + સિદ્ધયઃ ,સ્યાન્ + નિબોધ

ભૂતસૂક્ષ્માત્મનિ મયિ, તન્માત્રં(ન્) ધારયેન્મનઃ .

અણિમાનમવાપ્નોતિ, તન્માત્રોપાસકો મમ .. ૧૦..

ભૂત + સૂક્ષ્માત્ + મનિ, અણિમા + નમ + વાપ્નોતિ ,તન્માત્રો + પાસકો

મહત્યાત્મન્મયિ પરે, યથાસં(વ્)સ્થં(મ્) મનો દધત્ .

મહિમાનમવાપ્નોતિ, ભૂતાનાં(ગ્) ચ પૃથક્ પૃથક્ .. ૧૧..

મહત્યાત્ + મન્મયિ, મહિમા + નમ + વાપ્નોતિ

પરમાણુમયે ચિત્તં(મ્), ભૂતાનાં(મ્) મયિ રં(ગ્)જયન્ .

કાલસૂક્ષ્માર્થતાં(મ્) યોગી, લઘિમાનમવાપ્નુયાત્ .. ૧૨..

પરમા + ણુમયે, કાલ + સૂક્ષ્માર્ + થતાં(મ્), લઘિમા + નમ + વાપ્નુયાત્

ધારયન્ મય્યહં(ન્)તત્ત્વે, મનો વૈકારિકેઽખિલમ્ .

સર્વેન્દ્રિયાણામાત્મત્વં(મ્), પ્રાપ્તિં(મ્) પ્રાપ્નોતિ મન્મનાઃ .. ૧૩..

વૈકા + રિકેઽ + ખિલમ્ ,સર્વેન્દ્રિયા + ણામાત્ + મત્વં(મ્)

મહત્યાત્મનિ યઃ(સ્) સૂત્રે, ધારયેન્મયિ માનસમ્ .

પ્રાકામ્યં(મ્) પારમેષ્ઠ્યં(મ્) મે, વિન્દતેઽવ્યક્તજન્મનઃ .. ૧૪..

મહત્ + યાત્ + મનિ ,ધારયેન્ + મયિ , વિન્દતેઽ + વ્યક્ત + જન્મનઃ

વિષ્ણૌ ત્ર્યધીશ્વરે ચિત્તં(ન્), ધારયેત્ કાલવિગ્રહે .

સ ઈશિત્વમવાપ્નોતિ, ક્ષેત્રક્ષેત્રજ્ઞચોદનામ્ .. ૧૫..

ઈશિત્ + વમ + વાપ્નોતિ, ક્ષેત્ર + ક્ષેત્રજ્ઞ + ચોદનામ્

નારાયણે તુરીયાખ્યે, ભગવચ્છબ્દશબ્દિતે .

મનો મય્યાદધદ્ યોગી, મદ્ધર્મા વશિતામિયાત્ .. ૧૬..

ભગવચ્ + છબ્દ + શબ્દિતે,

મય્યા + દધદ્ ,વશિતા + મિયાત્

નિર્ગુણે બ્રહ્મણિ મયિ, ધારયન્ વિશદં(મ્) મનઃ .

પરમાનન્દમાપ્નોતિ, યત્ર કામોઽવસીયતે .. ૧૭..

પરમા + નન્દમાપ્ + નોતિ

શ્વેતદ્વીપપતૌ ચિત્તં(મ્), શુદ્ધે ધર્મમયે મયિ .

ધારયઞ્છ્વેતતાં(મ્) યાતિ, ષડૂર્મિરહિતો નરઃ .. ૧૮..

શ્વેતદ્ + વિપપતૌ, ધારયઞ્ + છ્વેતતાં(મ્), ષડૂર્ + મિરહિતો

મય્યાકાશાત્મનિ પ્રાણે, મનસા ઘોષમુદ્વહન્ .

તત્રોપલબ્ધા ભૂતાનાં(મ્), હં(વ્)સો વાચઃ(શ્) શૃણોત્યસૌ .. ૧૯..

મય્યા + કાશાત્ + મનિ, ઘોષમુદ્ + વહન્ ,તત્રો + પલબ્ધા

ચક્ષુસ્ત્વષ્ટરિ સં(ય્)યોજ્ય, ત્વષ્ટારમપિ ચક્ષુષિ .

માં(ન્) તત્ર મનસા ધ્યાયન્, વિશ્વં(મ્) પશ્યતિ સૂક્ષ્મદૃક્ .. ૨૦..

ચક્ષુસ્ + ત્વષ્ટરિ,ત્વષ્ટા + રમપિ

મનો મયિ સુસં(ય્)યોજ્ય, દેહં(ન્) તદનુ વાયુના .

મદ્ધારણાનુભાવેન, તત્રાત્મા યત્ર વૈ મનઃ .. ૨૧..

મદ્ + ધારણા + નુભાવેન

યદા મન ઉપાદાય, યદ્ યદ્ રૂપં(મ્) બુભૂષતિ .

તત્તદ્ ભવેન્મનોરૂપં(મ્), મદ્યોગબલમાશ્રયઃ .. ૨૨..

ભવેન્ + મનોરૂપં(મ્), મદ્યો + ગબ + લમાશ્રયઃ

પરકાયં(મ્) વિશન્ સિદ્ધ, આત્માનં(ન્) તત્ર ભાવયેત્ .

પિણ્ડં(મ્) હિત્વા વિશેત્ પ્રાણો, વાયુભૂતઃ(ષ્) ષડઙ્ઘ્રિવત્ .. ૨૩..

પાષ્ણ્યાઽઽપીડ્ય ગુદં(મ્) પ્રાણં(મ્), હૃદુરઃ(ખ્)કણ્ઠમૂર્ધસુ .

આરોપ્ય બ્રહ્મરન્ધ્રેણ, બ્રહ્મ નીત્વોત્સૃજેત્તનુમ્ .. ૨૪..

પાર્ + ષ્ણ્યાઽઽ + પીડ્ય , હૃદુરઃ(ખ્) + કણ્ઠ + મૂર્ધસુ ,નીત્વોત્ + સૃજેત્ + તનુમ્

વિહરિષ્યન્ સુરાક્રીડે, મત્સ્થં(મ્) સત્ત્વં(મ્) વિભાવયેત્ .

વિમાનેનોપતિષ્ઠન્તિ, સત્ત્વવૃત્તીઃ(સ્) સુરસ્ત્રિયઃ .. ૨૫..

વિમાનેનો + પતિષ્ઠન્તિ

યથા સં(ઙ્)કલ્પયેદ્ બુદ્ધ્યા, યદા વા મત્પરઃ(ફ્) પુમાન્ .

મયિ સત્યે મનો યું(ઞ્) જં(વ્)સ્ તથા તત્ સમુપાશ્નુતે .. ૨૬..

સમુપાશ્ + નુતે

યો વૈ મદ્ભાવમાપન્ન, ઈશિતુર્વશિતુઃ(ફ્) પુમાન્ .

કુતશ્ચિન્ન વિહન્યેત, તસ્ય ચાજ્ઞા યથા મમ .. ૨૭..

ઈશિતુર્ + વશિતુઃ(ફ્), કુતશ્ + ચિન્ + ન

મદ્ભક્ત્યા શુદ્ધસત્ત્વસ્ય, યોગિનો ધારણાવિદઃ .

તસ્ય ત્રૈકાલિકી બુદ્ધિર્- જન્મમૃત્યૂપબૃં(વ્)હિતા .. ૨૮..

જન્મમૃત્યૂ + પબૃં(વ્)હિતા

અગ્ન્યાદિભિર્ન હન્યેત, મુનેર્યોગમયં(મ્) વપુઃ .

મદ્યોગશ્રાન્તચિત્તસ્ય, યાદસામુદકં(મ્) યથા .. ૨૯..

અગ્ન્યા + દિભિર્ + ન, મુનેર્ + યોગમયં(મ્)

મદ્યો + ગશ્રાન્ + તચિત્તસ્ય , યાદસા + મુદકં(મ્)

મદ્વિભૂતીરભિધ્યાયન્, શ્રીવત્સાસ્ત્રવિભૂષિતાઃ .

ધ્વજાતપત્રવ્યજનૈઃ(સ્), સ ભવેદપરાજિતઃ .. ૩૦..

મદ્ + વિભૂતી + રભિ + ધ્યાયન્ ,

શ્રીવત્સાસ્ + ત્રવિભૂષિતાઃ , ધ્વજા + તપત્ર + વ્યજનૈઃ(સ્)

ઉપાસકસ્ય મામેવં (મ્), યોગધારણયા મુનેઃ .

સિધ્ધયઃ(ફ્) પૂર્વકથિતા, ઉપતિષ્ઠન્ત્યશેષતઃ .. ૩૧..

યોગધા + રણયા, ઉપ + તિષ્ઠન્ત્ય + શેષતઃ

જિતેન્દ્રિયસ્ય દાન્તસ્ય, જિતશ્વાસાત્મનો મુનેઃ .

મધ્ધારણાં(ન્) ધારયતઃ(ખ્), કા સા સિધ્ધિઃ(સ્) સુદુર્લભા .. ૩૨..

જિતશ્ + વાસાત્ + મનો

અન્તરાયાન્ વદન્ત્યેતા, યું(ઞ્) જતો યોગમુત્તમમ્ .

મયા સમ્પધમાનસ્ય, કાલક્ષપણહેતવઃ .. ૩૩..

સમ્પધ + માનસ્ય, કાલ + ક્ષપણ + હેતવઃ

જન્મૌષધિતપોમન્ત્રૈર્- યાવતીરિહ સિધ્ધયઃ

યોગેનાપ્નોતિ તાઃ(સ્) સર્વા, નાન્યૈર્યોગગતિ(મ્) વ્રજેત્ .. ૩૪..

જન્મૌ + ષધિતપો + મન્ત્રૈર્ ,

યોગેનાપ્ + નોતિ ,નાન્યૈર્ + યોગગતિ(મ્)

સર્વાસામપિ સિધ્ધીનાં(મ્), હેતુઃ(ફ્) પતિરહં(મ્) પ્રભુઃ .

અહં(મ્) યોગસ્ય સાં(ઙ્)ખ્યસ્ય, ધર્મસ્ય બ્રહ્મવાદિનામ્ .. ૩૫..

અહમાત્માન્તરો બાહ્યોડ-નાવૃતઃ(સ્) સર્વદેહિનામ્ .

યથા ભૂતાનિ ભૂતેષુ બહિરન્તઃ(સ્) સ્વયં(ન્) તથા .. ૩૬..

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(વ્)સ્યાં(મ્)

સં(વ્)હિતાયામેકાદશસ્કન્ધે પઞ્ચદશોઽધ્યાયઃ .. ૧૫..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે

પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.

ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ.

